श्रीगणेशायनमः श्रीसूत उवाच जितंतेऽजितविद्धर्यस्वस्तयेस्व
स्तिरस्तुमे भवतारावसाराद्धंसर्वस्माआत्मनेनमः १ नमःपंकज
नाभायभूतसूक्ष्मेंद्रियात्मने वासुदेवायशांताय कूटस्थायस्वरो
चिषे २ संकर्षणायसूक्ष्मायदुरंतायांतकायच नमोविश्वप्र
बोधायप्रद्युम्नायांतरात्मने ३ नमोनमोनिरुद्धायहृषीकेशें
द्रियात्मने नमःपरमहंसायपूर्णायनिभृतात्मने ४ स्वर्गापव
र्गद्वारायनित्यंशुचिषदेनमः नमोहिरण्यवीर्यायचातुर्होत्राय
तंतवे ५ नमऊर्जइषेत्र्यायःपतयेपशूरेतसे तृप्तिदायचजीवा

नोनमःसर्वस्मात्मने॥६॥सर्वस्मात्मदेहायविरोषाय
स्थवीयसे नमस्त्रैलोक्यपालायसहओजोबलायच
७ अर्थलिंगायनभसेनमोनर्वहिरात्मने॥नमःपु-
ण्यायलोकायअमुष्मैभूरिवर्चसे॥८॥प्रवृत्तायु
निवृत्तायपितृदेवायकर्मणे नमोधर्मविपाकाय
मृत्यवेदुःखदायच॥९॥नमस्तेआधिषामीश्रामृन
वेकारणात्मने नमोधर्मायबृहतेकृष्णायाकुंठमे

धसे॥१०॥पुरुषायपुराणायसांख्ययोगेश्वरायच
शक्तित्रयसमेतायमीढुषेहंकृतात्मने॥११॥चेत
आकूतिरूपायनमोवाचाविभूतये दर्शनंनोदिदृ
क्षूणांदेहिभागवतार्चितं॥१२॥रूपंप्रियतमंस्वा
नांसर्वेंद्रियगुणांजनं स्निग्धप्रावृड्घनश्यामं स
र्वसौंदर्यसंग्रहं॥१३॥चार्चायतचतुर्बाहुंसुजात
रुचिराननं॥पद्मकोशपलाशाक्षंसुंदरभ्रुसुना

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

सिकं १४ कटिनंस्फकपोलास्यंसमकर्णविभूषणं श्री
तिग्महसिताषांगमलकैरुपशोभितं १५ लसत्पंकज
किंजल्कदुकूलंस्पष्टकुंडलं स्फुरत्किरीटवलयहारनूपु
रमेखलं १६ शंखचक्रगदापद्ममालामण्युत्तमर्द्धि
मत्॥सिंहस्कंधत्विषोविभ्रत्सौभगग्रीवकौस्तुभं॥श्रि
यानपायिन्यापक्षिप्तनिकषाश्मोरसोल्लसत्पूरकरेचक
संविग्नवलिवल्गुदरं॥१८॥प्रतिसंक्रामयद्भिर्ना

भ्यावर्तगभीरया स्वनाभ्योपधिरोचिष्णुदुकूलस्व
र्णमेखलं १९ समचार्वंघ्रिजंघोरुनिम्नजानुसुदृश्य
नं पदारत्यपलाशरोचिषानखद्युभिर्नोतरघं
विधुन्वता २० प्रदर्शयत्स्वीयमपास्तसाध्वसं पदं गु
रोर्मगिरुस्तमोजुषां एतद्रूपमनुध्येयमात्मशुद्धि
मभीप्सतां २१ य इत्थंयोगमयः स्वधर्ममनुति

३ घतां भवान्भक्तिमताऽभ्योऽलभिः सर्वदेहिनां २२
साराज्यस्याप्यभिमतएकांतेनात्मविप्लुतिः तंदुरा
ध्यमाराध्यसतामधिदुरत्यया २३ एकांतभक्त्या
कोवांछेत्पादमूलंविनाबहिः यत्रनिविष्टमरणंक
तांतोनाभिमन्यते २४ विश्वंविध्वंसयन्वीर्यशौ ३
र्यविस्फूरितभ्रुवा क्षणार्धेनापितुलयेनस्वर्गिणा

पुनर्भुवं २५ भगवत्संगिसंगस्यमर्त्यानांकिमुताद्भिषः॥
अथानघांघ्रेस्तवकीर्तितीर्थयोरंतर्बहिःस्नानविधूत
पाप्मनां २६ भूतेष्वनुक्रोशसुसत्वशीलिनांस्यात्संग
मोनुग्रहएषनस्तव नयस्यचित्तंबहिरर्थविभ्रमं
मोहायांचविशुद्धमाविरात् २७ यद्वाक्तियोगा
नुग्रहीतमंजसामुनिर्विचष्टेनतुतत्रतेगतिं यत्रेद

४ व्यंजतेविभ्वंविश्वस्मिन्वभातियत् २८ तत्वंब्रह्मपरं
य ज्योतिराकाशमिवविस्मृतं योमायेदंपुरुरूपयास्व
जद्विभर्त्तिह्रस्यःक्षययत्यविक्रियः २९ यद्वैदबुधिः
सदिवात्मदुच्छयातमात्मतंत्रंभगवन्प्रतीमहि क्रि
याकलायैरिदमेवयोगिनःश्रद्धान्विताःसाधुयजंति ४
सिद्धये ३० भूतेंद्रियांतःकरणोपलक्षितंवैदेच

तंत्रेचतएवकोविदाः त्वमेकआद्यःपुरुषःसुप्तशा
क्तिस्तयारजःसत्वतमोविभिद्यते ३१ महानहंख
रु मनुंदृन्द्रियाःसुरर्षयोभूतगणाइदंयतः सृष्टं
स्वशक्त्येदमनुप्रविष्टश्चतुर्विधंपुरमात्मांशकेन
३२ अथाविदुस्तंपुरुषंसंतमंतर्हृषीकैर्मधुसा
रथंयः सएषलोकानतिचंडवेगोविकर्षसित्वंख

लुकालयानः ३३ भूतानि भूतेरनुमेयतत्त्वो घनावली वायुरिवाविषह्यः ॥ प्रमत्तमुच्चैरितिकृत्यचिंतया प्रवृद्धलोभं विषयेषुलालसं त्वमप्रमत्तः सहसाभिपद्यसे क्षुल्लिहानोहिरिवाखुमंतकः ३४ कस्त्वत्पदा ब्जं विजहातिपंडितो यस्त्वमानत्यमानकेतनः विरं कयास्मद्गुरुरर्चतिस्म यद्विनोपपत्तिंमनवश्चैद्वा ३५

अथत्वमसिनोब्रह्मन्परमात्मन्विपश्चितं विश्वंरुद्भयध्वस्तमकुतश्चिद्भयागतिः ३६ इदंजपतभद्रंवोविशुद्धान्तपनंदनाः स्वधर्ममनुतिष्ठंतोमयर्पितात्रायाः ३७ तमेवात्मानमात्मस्थंसर्वभूतेष्ववस्थितं पूजयध्वंगृणंतश्चध्यायंतश्चासकृद्धरिं ३८ योगादेश्रमुपासाद्यधारयंतोमुनिव्रताः समाहितधियःसर्वएतद्भ्यसनाद्दृताः ३९ इदमाहपुरास्माकंभगवान्विश्वसृक्पतिः भृग्वादीनामात्मजानांसिसृक्षुःसंसिसृक्षतां ४० तेवयंनोदिताःसर्वप्रजास

र्गेप्रजेश्वराः अनेनध्वस्ततमसःससृक्षोविविधाःप्रजाः क्षे
अथेदंनित्ययुक्तोजपन्नवहितःपुमान् अचिराच्छ्रेयआ
प्नोतिवासुदेवपरायणः ८२ श्रेयसामिहसर्वेषांज्ञाननिष्ठ
श्रेपसंपरं सुखंतरतिदुःपारंज्ञाननौर्व्यसनार्णवं ८३
यइमंश्रद्धयायुक्तोमद्गीतंभगवत्स्तवं अधीयानोदुराएध्य
हरिमाराधयत्यसौ ८४ विंदतेपुरुषोमुष्माद्यद्यदिच्छत्सु
वरन् मद्गीतगीतात्सुप्रीतात्श्रेयसामेकवल्लभात् ८५

इदंयःकल्पउत्थायप्रांजलिःश्रद्धयान्वितः शृणुयाच्छ्रा
वयेन्मर्त्योमुच्यतेकर्मबंधनैः ८६ गीतंमयेदंनरदेवनंदना
परस्यपुंसःपरमात्मनस्तवं जपंतएकाग्रधियस्तपोमह
रध्वमंतेतपआस्थेषितं ८७ इतिश्रीभागवतेमहापुरा
णेचतुर्थस्कंधेऽष्टमोगीतंनामचतुर्विंशोध्यायः श्रीसांब
जोगळेकरोपनामकहरिभट्टात्मजपरशुरामेणलिखापितंस्वार्थंपरार्थंच

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

ऽ

रुद्रगीतसमाप्तः

ऽ